No. ११७४

Title पुरश्चरण विधिः

Author शैव गोपीनाथः

Extent १३ पत्राणि Age

Subject तन्त्रम्

पुरश्चरणविधिः

११७४

श्रीगणेशायनमः ओं शिवादींश्च गुरून्नत्वा पुरश्चरणमुच्यते विनानयेन सिद्धिः स्यान्मंत्रो वर्षशतैरपि १ इ
त्यावश्यकतास्य संप्रति ततः संक्षेपतस्तद्विधिं वक्ष्ये पूर्वसमीरिताखिलमनुन्यासक्रियामभ्यसेत् गत्वा
स्वगुरोस्समीपवरं संप्रार्थयेत्सादरं सतां शिष्यः प्रथमं ततश्च स्तदनुष्ठानांगदीक्षां पुन २ गुरुरपि शु
भकाले देशिकाय प्रदद्यादखिलसुखसमृद्ध्यै मंत्रराजस्य दीक्षां तदिह बहुभिरुक्ता मासतिथ्यृक्ष
वाराः क्रमतइह लिख्यामि श्रेयसे ये त्र संति ३ वैशाखे श्रावणे वापि आश्विने कार्तिके तथा फाल्गुने मार्गशी
र्षे वा कुर्यान्मंत्रस्य दीक्षणं ४ पूर्णिमा पंचमी चैव द्वितीया सप्तमी तथा त्रयोदशी च दशमी प्रशस्ता सर्वकाम
दा ५ तृतीया पंचमी वा षष्ठी वापि विशेषतः द्वादश्यामपि कर्तव्यं त्रयोदश्यामथापि वा ६ कुत्रचिन्निषिद्धा
त्वासष्ठीत्रयोदश्योर्मध्यमत्वं ग्रंथांतरे षष्ठी भाद्रपदे मासि शेषेष्वत्र यादशी कार्तिके नवमी शुक्ला श्राव
णे कृष्णपंचमी ७ एतानि देवपर्वाणि तीर्थकोटिफलानि च कृष्णाष्टम्यां चतुर्दश्यां पंचपर्वदिने तथा ८
ग्रहणादौ व्यतीपाते परिवेषेंदुसूर्ययोः नवारमासदोषोस्ति ग्रहणे चंद्रसूर्ययोः ग्रहणं देवदेवेशि कालः
सप्तदिनावधि अथ नक्षत्राणि अश्विनी रोहिणी स्वाति विशाखा हस्तभेषु च श्रवणार्द्रा धनिष्ठा च पुष्यः

प्रातभिषक्तथादीक्षानक्षत्रजातानिस्युध्रुवसंज्ञार्थकोविदाः रवौगुरौसेवुधोदीक्षाकर्तव्याबुधशुक्रयोर्मं
त्रार्थमौरवौशुक्रेबुधेजीवेविशेषतः शनौमृत्युहायौभौमेसर्वचनिः फलमितिवचनात्सोमस्यमध्यत्वं
सिद्धं तत्रशेखरे शरत्कालेवैशाखेदीक्षाश्रेष्ठफलप्रदाफाल्गुनेमार्गशीर्षेच ज्येष्ठेदीक्षा च मध्यमाः
आषाढेश्रावणेमाघेकनिष्ठासर्विदारता निंदितश्चाधिमासस्तुपौषोभाद्रपदस्तथानिंदितेष्वपिमा
सेषुदीक्षांकाम्यहणेशुभा गंथांतरेगुरुशुक्रोदयेशुद्धेलग्नेसद्वारशोधिते चंद्रतारानुकूल्येषुग्र
हणेचंद्रसूर्ययोः दीक्षाविधेयामंत्रैःपुरुषार्थप्रसिद्धये नमासतिथिवारादिशोधनंसूर्यपर्वणि दक्ष ए ५
तीर्थं च मन्त्रीयातस्मिन्कालेगुरोर्नरः सिद्धिर्भवतिमंत्रस्यविनाभ्यासेनवेगतः प्रबुद्धेबल
संयुक्तेशुक्रेदेवगुरौतथाशुक्लपक्षेचकृष्णेवादीक्षासर्वशुभावहा कालांतरेमुक्तिका
मेकृष्णपक्षेभुक्तिकामेसितेसदा संहितायां मेषकर्कटकन्यासुतुलायांवृश्चिकेतथा
थामकरकुंभयोश्चैवदीक्षासर्वशुभावहा रुद्रयामले सतिथेर्कविधुमासे तथाद

मन्नपर्वणि मंत्रदीक्षां प्रकुर्वीत मासर्क्षादीन्न शोधयेत् संहितायां विष्णुवेश्यायनदंष्ट्रसं
2 क्रांत्यां दमनोत्सवे दीक्षा कार्या न कालेपि पवित्रे गुरुपर्वसि आगमे च स तीर्थके विधु-
ग्रासे पुण्यारण्यवने शुभ पुण्यक्षेत्रे कुरुक्षेत्रे देवीपीठचतुष्टये प्रयागे श्रीगुरोः का
श्यां कालाकालेन शोधयेत् तत्वसारसंहितायामपि तीर्थं विनापि दीक्षायां विशिष्ठा
वसरं श्रणु दुर्लभे सद्गुरूणां च सकृत्संग उपस्थिते तदनुज्ञा यदा लब्धा सदीक्षा
वशो महान् ग्रामे वा यदि वारण्ये क्षेत्रे वा यदि वा निशि आगच्छति गुरुर्दैवाद्यथा दी
क्षा तदा भवेत् तत्वसारे यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः न तिथिर्न व्रतं हो
मो न स्नानं न जपक्रिया दीक्षायाः कारणं किंतु स्वेच्छावाप्ते तु गुरौ इति मुमुक्षुं प्रतिन
कालनियमः निषिद्धानि सर्वपर्वाणि प्रशस्तानि विमुक्तये इति वचनात् वैशंपा
यनसंहितायां संध्यागर्जितनिर्घोषभूकंपोल्कानिपातनं एतानन्यांश्च दिशान्स्य २

त्युक्तां च परित्यजेत्॥ इति काम्याविषयं तद्देवलग्नमिति सामान्यदीक्षाकालः॥ इति दीक्षाकालः
अथ दीक्षां प्रवक्ष्यामि संक्षिप्तां गुरुसंमतां॥ मुहूर्ते सर्वतोभद्रेन वं कुंभं विधाय चान्सोदकं गं
धपुष्पाभ्यामर्चितं वस्त्रसंयुतं॥ सर्वौषधीपंचरत्नपंचपल्लवसंयुतं॥ ततो देवार्चनं कृत्वा हुने
ददष्टोत्तरं शतं॥ शिष्यं मूलं कृत्वा विद्यामुपाग्निमुपवेशयेत् मंत्रितं प्रोक्षणीतोयैः शातकौंभ
जलैस्तथा॥ मूलमंत्रेणाष्टशतं मंत्रितैरभिषेचयेत्॥ अथ संपादयेन्मंत्रं हस्तं शिरसि न्या
स्य तत्र ॐ मस्त्विति स्वक्षतानं दद्याद्यथाशिष्योर्चयेद्गुरुमिति॥ अत्रापवशात्कश्चित् इष्टमर्प्य
र्य साक्षतैस्तैत देवु नामिषिच्याय तात्र मूलेन केकरं॥ निधाय पाथजपेत्कर्णे उपदेशे त्वयं वि
धिः॥ उपदेशसुधायां तु॥ चंद्रसूर्यग्रहे चैव सिद्धक्षेत्रे सुरालये॥ मंत्रमात्रप्रकथनं उपदेशः
स उच्यते इति॥ शिवः अदीक्षा ये च कुर्वंति जपपूजादिकां क्रियां॥ निःफलं तस्य ये ते षां शिलाया
मुप्तबीजवत्॥ उपदेशानंतरं गुरुकर्णे दत्वा शिष्याय मनुं न्यस्याय गुरुः॥ कृतात्मयजनवि
धिः॥ अष्टोत्तरसहस्रं स्वशक्तिहीनाय वाष्टायजप्यादिति॥ अकुंठितसामर्थ्याय जपेदित्यर्थः॥
मंत्रग्रहणानंतरं शिष्यकर्णे अष्टोत्तरशतं शिष्यः प्रजयेद्गुरुतोदितः॥ अष्टाविंशतिवारं वा लक्ष

मा

कृत्वो यथा जपेत्॥ ततो जातमंत्रः स्वमंत्रप्रदाय प्रदद्यात्ततो दक्षिणां स्वशक्त्या तदा च कैश्चित् वदंति २१
तथा नारदीये· आचार्याद्दत्तमभिप्राप्य मंत्रमस्मादत्तदक्षिणः॥ अभ्यस्तोपि सदा मंत्रः श्रेयसे नावकल्पते के
तंत्रे चोक्तं संग्रहे॥ नगृहीत्वा नमात्रेण परत्रेह च मंगलं॥ प्राप्नोति चेद्दुर्वदने दानहोमादिभिर्विना
गृहस्थो यदि दानादि दद्यात्तज्जुहुयादपि॥ पूजयेद्विधिनानेन कः कुर्याच्च तद्गृहमिति॥ गृहस्थाव
षयाणि वाक्याणि द्विविधं तुलक्षुमनोवीक्ष्यां नरमुपासनं न्यासिनां चांतरं प्रोक्तमन्येषामुभयं तत
था॥ यतिभिर्भाविते द्वयेः पूज्यो हृषि गुरुस्सदा॥ संपादिते गृहस्थस्तु स एव क्रमउच्यते॥ अन्येषा
मित्यनेन ब्रह्मचार्यादीनां द्विविधमुपासनमिति॥ अन्यदपि प्रणवाक्षरप्राणायाममंत्रा अग्नेयाः
द्रुद्रमन्ताक्षरप्रायामंत्राः सौम्याः सूर्ये वहति आग्नेयानां प्रबोधकालः॥ चंद्रे सौम्यानां सुप्र
बोधकाले मंत्रग्रहणं जपेच्च कृते तात्कालिकी सिद्धिः स्यादेवेति॥ ग्रंथांतरे चिकीर्षुर्दैवतोपा
स्तिमादौ भावं विचारयेत्॥ स्नानसंध्यादिकं कृत्वा स्मृत्वा हरिपदांबुजं शयीत कुशशय्यायां प्रार्थ
येच्च वृषध्वजं भगवन्देवदेवेश शूलभृद्वृषवाहन॥ इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत
नमो जयत्रिनेत्राय पिंगलाय महात्मने भीमाय वामदेवाय सुष्माय स्वमाधिपतये नमः॥ स्वप्ने क

यथेष्टमेतथ्यं सर्वकार्यमशेषतः॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वरः॥ एभिर्मन्त्रैः शिवमा
र्ग्यं निद्रां कुर्यान्निराकुलः॥ समद्दष्टं निशि प्रातः गुरवेपि निवेशयेत्॥ तत्संतरेण मंत्रज्ञः स्वयं चैव वि
चारयेत्॥ इति शैवमाधवपाठकाग्निहोत्रिसुत शैवगोपीनाथपाठकाग्निहोत्रिविरचिते पुरश्चर
णविधौ संक्षेपदीक्षाविधिः॥ अथ गुरुशिष्ययोरन्यपरीक्षा प्रोच्यते मया॥ गुरुशिष्यावुभौ मोहाद
परीक्ष्य परस्परं॥ अज्ञानाच्छिष्योपदेशं तु योगत्क्षान्तिं(?) ददाति च। भुंजेते तावुभौ घोरान्नरकानेकविंशति
अनर्हे मंत्रविज्ञानं न कुर्वीत कदाचन॥ तस्मात्सपरीक्ष्य वक्तव्यमन्यथा निःफलं भवेत्॥ यः स्नेहम
यल्लोभाद्यैरयोग्यं यदि दीक्षयेत्॥ देवताशापमाप्नोति कृतं च निःफलं भवेत्॥ ज्ञानेन क्रियया वा
पि गुरुशिष्यं परीक्षयेत्॥ संवत्सरं तदर्धं वा तदर्धं वा प्रयत्नतः॥ शिष्योपि लक्षणैरेतैः कुर्याद्गुरुपरी
क्षणं॥ आनंदाद्यैर्जपैः स्तोत्रैर्ध्यानहोमार्चनादिषु॥ ज्ञानोपदेशसामर्थ्यं मन्त्रस्तुद्धिमयीश्वरे॥ बो
धकत्वं च विज्ञाय शिष्यो भूयान्न चान्यथा॥ गोविंदार्चनसुध्यायां सगुणभजनवर्त्मा श्वाश्रमाचार
त्र रूढः॥ श्रवणमननमंत्री सद्गुरुः कौशोभः॥ स्फुरद्दमलचिदात्मा ब्रह्मरूपो महात्मा भवसमरजिता
रिः योगिसज्जो गुरुः स्यात्॥ आगमे॥ गुरुर्नहस्त एवैकोनकदाचित्प्रयतिर्गुरुः अयमेव यतीनां स्या

पतिर्गुरुस्त्रियाः पिता ॥ केवलं कामिपरो यमुपमः ॥ तथा च ॥ सूतसंहितायां ॥ उत्तमः पंचधा प्रोक्तो गुरुः सर्वे
लोकस्तु वेदिभिः ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ॥ अतिवर्णाश्रमी चेति क्रमश्रेष्ठा विचक्ष
णा ॥ कुलार्णवे च ॥ श्रीगुरुः परमेशानि शुद्धवेशो मनोहरः ॥ सर्वलक्षणसंपन्नः सर्वावयवशोभितः
अग्रगण्यो गभीरश्च पात्रापात्रविशेषवित् ॥ शिववद्विष्णुः समः साधुनचदर्शनदूषकः ॥ नित्ये नैमित्ति
के काम्ये रतः कर्मण्यनिंदिते ॥ यदृच्छाभेलोसंतुष्टो गुणदोषविभेदकः ॥ इत्यादिलक्षणोपेतः श्रीगु
रुः कथितः प्रिये ॥ अत्रिनेत्रः शिवः साक्षादचतुर्बाहुरच्युतः ॥ अचतुर्वदनो ब्रह्मा श्रीगुरुः कथितः
प्रिये ॥ तथा च ॥ ज्ञानोलये ॥ निंदितस्तु पितुर्मंत्रस्तथा मातामहस्य च ॥ सोदरस्य कनिष्ठस्य वैरि
पक्षाश्रितस्य च ॥ न तु स्त्रीदत्ते[illegible]मन्त्रे च सिद्धिहीनैव शोधयेदित्यनेन स्त्रीणामपि आचार्या
त्वं प्राप्तं सत्यं ॥ किंतु स्वमदेवनाशानात्स्त्रीतः प्राप्ते तद्विषयः सिद्धवचः ॥ स्त्रीशूद्राणां साक्षात्स्व आचा
र्यत्वस्य निषेधात् ॥ तथा चोक्तं स्त्रियः शूद्रादयः श्चापि बोधयेयुर्हिताहितं ॥ यथार्हमाननीयाश्च ना
र्हं साचार्यतां क्वचित् ॥ शूद्राणां शूद्रसंपर्कः शूद्रेणैव सहासनं ॥ शूद्राणामागमः कश्चिज्ज्वलंतमि ४
व पातयेत् ॥ सूतसंहितामपि ॥ शूद्राणां च तथा स्त्रीणां गुरुत्वं न कदाचनेति ॥ योग्यमापं गुरुं स्य

कोशिष्यः शूद्रं क्रियाविदं गुरुं समाश्रयेदन्यं यः प्रयाति स दुर्गतिं ॥ इति गुरुपरीक्षा ॥ नास्तिकान्भिन्नम
र्यादान्कृतघ्नान्वेदनिंदकान् ॥ मंत्राक्षरोपदेशे तु दूरतः परिवर्जयेत् ॥ सनत्कुमारस्य ॥ न देयमर्थलब्ध
ये पिशुनायास्थिराय च ॥ भक्तिश्रद्धाविहीनाय शुश्रूषाविमुखाय च ॥ कुलार्णवे ॥ दासस्य शिवभक्तस्य
हितप्रियकरस्य च ॥ शूद्रस्यापि प्रदातव्यं नमोंतं प्रणवं विना ॥ विना प्रणवेन मंत्रः ॥ स्त्रीशूद्राणां प्रसाद
कः ॥ प्रणवेन समायुक्तस्तपो देवी विशेषमः ॥ आगमेपि स्त्रीणां प्रणवसंयुक्तं मंत्रं स्त्रूद्रं वदन्नद्विजः शूद्र
त्वंतल्लतामेति विप्रः शूद्रत्वमेव हि ॥ त्रैवर्णिकाय शुद्धाय स्वधर्मनिरताय च ॥ मंत्रचिंतामणौ देवो ब
हुदाय प्रियाय च ॥ स्वशिष्याय स्वभक्ताय यज्ज्ञानमुपदिश्यते ॥ तत्प्रयाति पवित्रत्वं गोक्षीरं स्वादुतामि
व ॥ अशिष्ये षस्वभक्तेषु यज्ज्ञानमुपदिश्यते ॥ तत्प्रयाति पवित्रत्वं गोक्षीरं स्वादुतामिव ॥ अमात्यदोषो
राजानं भार्यादोषः पतिं यथा ॥ तथा शिष्यकृतो दोषो गुरुं प्राप्नोत्यसंशयं ॥ तस्माच्छिष्यं गुरुर्नित्यं परीक्षे
त परीक्ष्य हेतवः ॥ इति शिष्यपरीक्षा ॥ अथ दशसंस्कारस्यं मंत्राणां प्रोच्यते मया ॥ कर्मण्यपि पृथङ्मंत्रा
मंत्रिणा योजिता अपि ॥ तस्मात्तद्दोषनाशाय कर्तव्याः संस्कारा दश ॥ तथा च शारदातिलके ॥ मंत्रा
णामपि संस्कारान्कथयंते सिद्धिदायिनः ॥ जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥ अथाभिषेको विमली

द्धि

करणंप्यायनंपुनः॥ तर्पणंदीपनंगुप्तिर्दशैतास्तुमंत्रसंस्क्रियाः॥ ताश्चयथा॥ मंत्राणांमातृकामध्यादुद्धा
रोजननंस्मृतं॥ प्रणवांतरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः॥ एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः॥ मं
त्रवर्णान्समालिख्यताडयेच्चंदनांभसा॥ प्रत्येकंवायुनामंत्रीताडनंतदुदाहृतं॥ विलिख्यमंत्रंतन्मं
त्रीप्रसूनैःकरवीरजैः॥ तन्मंत्राक्षरसंख्यातैर्हन्यात्तेनबोधनं॥ स्वतंत्रोक्तविधानेनमंत्रीमंत्रार्णसं
ख्यया॥ अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये॥ संचिंत्यमनसामंत्रंज्योतिर्मंत्रेणनिर्दहेत्॥ मंत्रेम
लत्रयंमंत्रीविमलीकरणंत्विदं॥ तारंव्योमाग्निमनुयुग्दंडीज्योतिर्मनुर्मतः॥ कुशोदकेनजप्तेनप्रत्य
र्णंप्रोक्षणंमनोः॥ तेनमंत्रेणविधिवदेतदाप्यायनंमतं॥ मंत्रेणवारिणामंत्रेतर्पणंस्मृतं॥ तारमाया
रमायोगोमनोर्दीपनमुच्यते॥ जप्यमानस्यमंत्रस्यगोपनंत्वप्रकाशनं॥ संस्कारादशसंप्रोक्ताःसर्व
तंत्रेषुगोपिताः॥ यान्कृत्वासंप्रदायेनमंत्रीवांछितमश्नुते॥ एवंदशसंस्काराः॥ तांबूलेवाभूर्जपत्रे
लिखितंमंत्रंवाकृत्वाकर्तव्याः॥ इतिदशसंस्काराः॥ अथसिद्धादिविचारः॥ सिद्धःसिध्यतिकालेनसाध्य
स्तुजपहोमतः॥ सुसिद्धोग्रहमात्रेण अरिर्मूलंनिकृंतति॥ तथाचोक्तं॥ मालतीविजये॥ द्वादशारेत
थाचक्रेकूटेषंठविवर्जितान्॥ आविहंतांलिखेद्वर्णान्पूर्वतोयावदीश्वरि॥ अंकानेकादिद्वादशांलि

खेत्पूर्वादितः क्रमात्॥ सिद्धः साध्यः सुसिद्धोरिश्चतुर्णां तु स्फुटी भवेत्॥ मंत्रसाधकयोराद्यो वर्णः
स्यात्तत्र कोष्ठके स एव सततं माद्यः स्ववर्णस्वरभेदतः नवैकपंचमे सिद्धः साध्यः षट्दशयुग्मके त्रिस
प्तैकादशे सुमित्रे वेदाष्टद्वादशे रिपुः॥ इत्यकडमचक्रं॥ एकाक्षरे तथा कूटे त्रैपुरे मंत्रनायके॥ स्त्रीदत्ते
स्वमे त्वथो च सिद्धादीन्नैव शोधयेत्॥ मंत्रसिद्धोपदिष्टेषु वर्तुरात्माय जेषु च मालामंत्रे स्वप्रिये चा सि
द्धादीन्नैव शोधयेत्॥ एकद्वित्र्यादिवीजस्य सिद्धादीन्नैव शोधयेत्॥ एषु दोषेषु सर्वत्र मायां कामम
थापि वा॥ क्षिप्त्वा साद्यादौ प्रियं दद्यात्सर्वदोषमिति श्रुतये॥ प्रणवो भुवनेशानी रमावीजं मनोभवं॥ जी
वनं सर्वमंत्राणामित्याह भगवाञ्छिवः॥ लुप्तबीजाश्च ये मंत्रा गोपालस्य क्वचित् क्वचित्॥ कामवीजं
मुखं तेषां दद्यात्सर्वार्थसिद्धये॥ श्रीवीजाद्यं यदा जप्यान्तदा लक्ष्मीरचंचला॥ कामाद्यं जपनादेव सर्व
लोकवशं नयेत्॥ मायादिजपनादेव वाचितद्विजो भवेच्चिरात्॥ शक्तिवीजादिको मंत्रो निर्वाणमचिरा
दिशेत्॥ पुटनात्प्रणवाभ्यां तु मोक्षमाप्नोति निश्चितं॥ एवं मंत्रवरं जप्त्वा किं न साध्यति मंत्रवित्॥
इति अरिमंत्रो गृहीतश्चेद्दसानवशात्ततदा॥ तस्य त्यागः प्रकर्तव्यः तत्प्रकारोऽधुनोच्यते॥ सुदिने
स्थापयेत्कुंभं सर्वतोभद्रमंडले॥ विलोमं स्वं जपेन्मंत्रं पूरयेत्तं सुपायसा तत्र देवं समावाह्य जपेदावर

णान्वितां॥ तदग्ने स्थंडिलं कृत्वा प्रतिष्ठाप्यानलं ततः॥ जुहुयान्मूलमंत्रेण विलोमेन शतं घृते॥ दि
क्पतिभ्यो बलिं दद्यात्पायसान्नैर्घृतान्वितैः॥ पुनः संपूज्य देवेशं प्रार्थयेन्मनुनामुना॥ अनुकूल्यम
नालोच्य मया तरलबुद्धिना॥ यद्रूपान्तं पूजितं च प्रभो मंत्रस्य रूपकं॥ तेन मे सन्न सः क्षोभमशेषं
विनिवर्तय॥ पापं प्रतिहतं चास्तु भूयाच्छ्रेयः सनातनं॥ ततो नु मम कल्याणं पावनी भक्तिरस्तु
मे॥ एवं संप्रार्थ्य देवेशं कर्पूरगरुचंदनैः विलोमं विलिखेत्॥ मंत्रं ताडपत्रे तदर्चयेत्॥ प्रवध्य तु
निजे मूर्ध्नि स्नायात्कुंभस्थितैर्जलैः पुनः संपूर्यतत्तोयेन पश्येमंत्रयंत्रकं॥ संपूज्य कुंभं सरितिजडागे
वा विनिक्षिपेत्॥ विप्रान्संभोज्य मुच्येत पीडया सो मंथयत्॥ इति सिद्धादिविचारः ऋणसिद्धादियो
गे शुमंत्रदाने विशेषतः प्रसिद्धं नाम गृह्णीयात्प्रसुप्तो येन आगते॥ नामाद्यक्षरमारभ्य यया
वन्मंत्रादिवर्णकं॥ त्रिधा कृत्वा स्वरैर्विधानदन्यद्विपरीतकं॥ कृत्वापि कोऽऋणी सेयो ऋणी चे
न्मंत्रमुत्तमं॥ स्वयं ऋणी चेन्मंत्रं त्यजेत्पूर्वं ऋणी यतः॥ प्रकारांतरेणापि॥ साध्यसाधकनामा
द्यः॥ साधकस्य तु षट्ततः॥ अष्टभिस्तु हरेद्भागं शेषं ऋणाधनं भवेत्॥ इति ऋणधन साधनं॥ ६
अथ जपस्थानानि॥ नारदीये॥ शिवस्य सन्निधाने च सूर्याग्न्योर्वा गुरोरपि॥ दीपस्य ज्वलित

स्यापि जपकर्म प्रशस्यते ॥ तथा च शिवः ॥ गृहे जपं समं विद्यात् गोष्ठे शतगुणं भवेत् ॥ नद्यां शतसहस्रं
स्यादनन्तं शिवसन्निधौ ॥ समुद्रतीरे ह्रदे च गिरौ देवालयेषु च ॥ पुण्याश्रमेषु सर्वेषु जपे कोटिगुणं भ
वेत् ॥ तत्पूर्वाभिमुखो वा स्याद्दक्षिणे चाभिचारिके ॥ पश्चिमं धनदं विद्यादुत्तरं शान्तिदं भवेत् ॥ अन्य
च्च ॥ अग्नेः पृष्ठे तथा वामे समीपे गर्भमन्दिरे ॥ जपेत्प्रदक्षिणं होमं न कुर्याद्धि शिवालये ॥ इति जपस्था
नानि ॥ इत्यादि स्थानमाश्रित्य दीपस्थानं विचिन्तयेत् ॥ कूर्मस्यैव मुखं विद्धि दीपस्थानं सुसिद्धिदं ॥
तद्यथा ॥ चतुरस्रां भुवं भित्वा कोष्ठानां नवकं लिखेत् ॥ पूर्वकोष्ठादि विलिखेत् सप्तवर्गाननुक्रमात् ॥
लक्षावीशे मध्यकोष्ठे स्वरान्युग्मक्रमाल्लिखेत् ॥ दिक्षु पूर्वादितो यत्र ग्रामः स्यादक्षरं भवेत् ॥ मुखं
तत्तस्य जानीयाद्धस्तावुभयतः ॥ स्थितौ कोष्ठे कुक्षौ उभौ पादौ द्वे शिष्टं पुच्छमीरितं ॥ कूर्मचक्रमिदं
प्रोक्तं मन्त्राणां सिद्धिसाधनं ॥ मुखस्थो लभते सिद्धिं करस्थः सर्वभोगवान् ॥ कुक्षिस्थितः शुभाभासी
नः पादस्थो दुःखमाप्नुयात् ॥ पुच्छस्थितो वधं बन्धं जपात्प्राप्नोति निश्चितं ॥ दीपस्थानं ततः क्षेत्रे कृत्वा
मन्त्री शुचिर्जपेत् ॥ क्षेत्रसाधकमन्त्राणां एकमेवाद्यमक्षरं ॥ यदि स्यात्स ध्रुवं मन्त्रः क्षिप्रमेव प्रसिद्ध
ति ॥ ग्रामं यानरो ॥ युग्मं स्वराणां विलिखेत्पूर्वं कादींश्च वर्णान् क्रमराः क्षमीशो ॥ स्थानाधिपस्याक्ष

रमस्तियत्रतत्प्रदेशंमुनयोवदंति॥इतिदीपचक्रं॥अथासनविचारः॥वंशाश्मधरणीदारु
तृणपल्लवनिर्मितं॥वर्जयेदासनंधीमान्दारिद्र्यव्याधिदुःखदं॥तूलकंबलवस्त्राणिपट्टव्याघ्रमृ
गाजिनं॥वर्जयेदासनंधीमान्सौभाग्यज्ञानसिद्धिदं॥वंशासनेदरिद्रत्वंपाषाणेव्याधिसंभवः
धरण्यांस्याद्दुःखभूतिर्दौर्भाग्यंदारुकासने॥तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः॥कृष्णा
जिनेज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रकर्मणि॥स्यात्पौष्टिकंचकौशेयंशांतिकंवेत्रविष्टरं॥वाशास
नेव्याधिनाशःकंबलेदुःखमोचनं॥स्यादाभिचारकंनीलेरक्तेवश्यादिकंभवेत्॥धवलेशां
तिकंमोक्षःसर्वार्थश्चित्रकंबले॥सर्वाभावेत्वासनार्थंकुशविष्टरमिष्यते॥इत्यासनानि॥अ
थजपमालामंत्रखंडे॥स्फाटकीमौक्तिकीवापिप्रोतव्यासितसूत्रकैः॥सर्वकर्मप्रसिद्ध्यर्थंजपे
द्रुद्राक्षमालया॥धर्मार्थकाममोक्षार्थंजपेत्पद्माक्षमालया॥अरिष्टपुत्रजीवैश्चशंखपद्मो
मणिस्तथा॥कुशग्रंथिश्चरुद्राक्षउत्तमंचोत्तरोत्तरं॥अन्यत्रापिरुद्राक्षश्वेतपद्माक्षमालेतु
अखिलेजपे॥अतिस्थूलोतिसूक्ष्मश्चस्फुटितोभंगुरोल्पदुर्गाभितःपुराध्वतोजीर्णोरुद्राक्षोनव
रःस्मृतः॥उक्तंवा॥अत्रामेजपमालायाःकरशाखासुपर्वभिः॥मध्यांगुल्यग्रपर्वादिप्राद

क्षिणाक्रमेणा तु ॥ अनामिकापायो मध्यात स्मादध्वः क्रमेणा तु ॥ तर्जन्यादौ जपो तश्च अक्षमालाक
रे स्थिता ॥ अंगुल्यग्रेषु तत्र जप्तं यज्जप्तं मेरुलंघने ॥ असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥ म
ध्यमायाद्द्वयं पर्वं जपकाले तु वर्जयेत् ॥ पर्वं मेरुं विजानीयात् तस्मात्नमरिवर्जयेत् ॥ अथवा करशाभिः
कर्त्तव्यो जापकैर्जपः ॥ अंगुल्या जपसंख्यानं एकमेकमुदाहृतं ॥ रेषयाष्टगुणं विंद्यात् पुत्रजीवैर्दश
स्मृतं ॥ शतं चंदनशंखैश्च प्रवालैस्तु सहस्रकं ॥ स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमेव च ॥
दशलक्षं राजतैश्चैः सौवर्णैः कोटिरुच्यते ॥ कुशग्रंथ्या च रुद्राक्षैरनंतगुणितं भवेत् ॥ अष्टोत्तर
शतैर्माला पंचाशैस्तु राधिके ॥ सप्तविंशतिभिः कार्या एकत्रीवास मेरुका ॥ मुखं मुखेन संयो
ज्य पुच्छं पुच्छेन योजयेत् ॥ प्रोतव्या सितसूत्रेण सत्कर्मफलसिद्धये ॥ पट्टसूत्रकृता माला रक्ष्याः प्री
तिकरी मताः ॥ कार्पासे वो क्षवी माला पद्मसूत्रेरथापि वा ॥ उर्णाभिर्वल्कले वापि शैवी माला प्रकी
र्त्तिता ॥ कार्पाससूत्रैरन्येषां विदध्याज्जपमालिकेति ॥ कमलायां विशेषः त्रिंशद्भिः स्याद्धनं पुष्टिः
सप्तविंशतिभिर्भवेत् ॥ पंचविंशतिभिर्मोक्षे पंचदश्याभिचारके ॥ पंचाशद्भिः कुलेशानि सर्वा
सिद्धिरुदीरिता ॥ श्रीशिवशानविशायामपि ॥ अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ॥ मध्य

१ मायां धनदा शांतिकरी त्वेशा स्यादनामिका ॥ कनिष्ठाकर्षणी शस्ता जपकर्मणि शोभने अंगुष्ठेन ज
पं जप्यमन्यैरंगुलिभिः सह ॥ अंगुष्ठेन विना कर्म कृतं तदफलं भवेत् ॥ मोक्षार्थं पंचविंशत्या सप्तविं
शति पौष्टिके ॥ त्रिंशच्च धनसंपत्त्यैः पंचदश्याभिचारके ॥ जपाक्षमालां सकलां भ्रामयेदाशिषाम
पि ॥ प्रदक्षिणं पुनर्वक्रं प्रारभ्यैवं समाचरेत् ॥ स्वयं वामेन हस्तेन जपमाला न संस्पृशेत् ॥ अदीक्षितो
द्विजो वापि स्पृष्टश्चेच्छुद्धिमाचरेत् ॥ न धारयेत्करे मूर्द्ध्नि कंठे च जपमालिकां ॥ जपकाले जपं कृत्वा सदा
शुद्धस्थले क्षिपेत् ॥ गुरुं प्रकाशयेद्धीमान् मंत्रं नैव प्रकाशयेत् ॥ अक्षमालां च मुद्रां च गुरोरपि न दर्श
येत् ॥ अन्यथा ॥ कंपनात्सिद्धिहानिः स्याद्धुननं बहुदुःखकृत् ॥ शब्दे जाते भवेद्रोगः करभ्रष्टा विना
शकृत् ॥ छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् ॥ जपांते कर्णदेशे वा उच्चस्थाने थवा न्यसेत् ॥
अक्षमाला हि धा प्रोक्ता कल्पिता कल्पितेति च ॥ कल्पिता मणिभिः कृत्वा मालिका स्यादकल्पिता ॥ आ
दिक्षांताक्षरैः प्रोक्ता माला वर्णमयी बुधैः ॥ अनुलोमविलोमाभ्यां गणये मंत्रवित्तमः ॥ जपमालां
विधायेत्थं ततः संस्कारमाचरेत् ॥ क्षालयेत्पंचगव्येन सद्योजातेन सज्जलैः ॥ वंदना गुरुगंधाद्यैर्वा
मदेवेन घर्षयेत् ॥ धूपयेल्लामघोरेण लेपयेत्पुरुषेण तु ॥ मंत्रयेत्पंचमेनैव प्रत्येकं तु शतं शतं ॥ मे

रुः च पंचमेनैव तथा मंत्रेण मंत्रयेत्॥ प्रक्षाल्य पंचगव्येन तथा पंचामृतेन च॥ संस्थाप्य पंचगव्येन
शिवकुंभस्थितेन च॥ येन प्रतिष्ठिता माला तमेव तु मतुं जपेत्॥ अन्यमंत्रं जपं विद्वान् न कुर्यात्कर्हि
चिद्बुधैः रिति॥ प्रकारांते॥ ईश्वर उवाच॥ वक्ष्ये नामथ संस्कारं यथाविधि समाचरेत्॥ प्रक्षाल्य पंचव
गव्येन तथा पंचामृतेन च॥ संस्थाप्य पंचगव्येन शिवकुंभस्थितेन च॥ सर्वं वै मूलमंत्रेण गंध
पुष्पाक्षतादिभिः॥ धूपदीपनैवेद्यादि दत्वा चाष्टशतं स्पृशेत्॥ मूलमंत्रं जपेत्पश्चाद्दंडवत्प्रणमे
द्बुधः॥ एवं या संस्कृता माला जपकर्मणि सर्वदा॥ अभीष्टफलदात्र्येषा सर्वपापविनाशिनी॥
मध्यमानामिकांगुष्ठै रक्षमाला मणी शतैः॥ एवं जपस्य चैकस्य क्रमोयं चालयेज्जपेत्॥ अंगुष्ठेन
तु मोक्षाय मध्यमपुर्विवृद्धये॥ जपेदनामिकांगुष्ठेने तर्तम्भां कदाचन॥ इति ग्रंथांतरे तु॥ अंगुष्ठमध्य
मायोगात् सर्वसिद्धिप्रदायिनीति॥ इत्यक्षमाला॥ अथ भक्ष्याभक्ष्यविचारः॥ तथा च गौतमीये॥
चरुमूलफलक्षीरदधिभिक्षान्नसत्कवः॥ शाकश्चाष्टविधं चान्नं साधकस्योच्यते बुधैः॥ तदपि
प्रशस्तं नात्युष्णं न चोच्छिष्टं न चाधिकं॥ तदुक्तं नारदीये॥ षडकोसंसुपक्वं च कुर्याद्वैलक्ष्णु भोज
नं॥ नेंद्रियाणां विकारं स्यात्तथा भुंजीत साधकः॥ यद्यत्तद्वा परीत्याज्यं तु ष्ठातं कुत्सितं तथा
प्रशस्तान्नं समश्नीयान्मंत्रसिद्धिमयीहया॥ पयोव्रते तु विशेषः॥ पयोव्रतस्य सिद्धिः स्यात् लक्ष्मेनै

९

वन संशयः॥ शाकमैक्ष्य हविष्याशी कल्लोलक्ष जपेत्॥ भिक्षान्नं तु न गृहिणः॥ यतिश्च ब्रह्मचारी
च भिक्षान्नंजीविनौ मतौ॥ सर्वधर्मबहिर्भूतो गृही भिक्षान्नजीविनः॥ इति भक्ष्याभक्ष्यविचारः॥ अथ नि
यमः॥ लवणं पललं चैव क्षारं क्षौद्रं रसान्तरं॥ माषमुद्गमसूरांश्च कोद्रवांश्चणकानपि॥ असद्भाषण
मन्यायं वर्जयेदन्यपूजनं॥ विनाश्रमो विहितं नित्यमथ नैमित्तिकं च यत्॥ स्त्रीशूद्रपतितव्रात्यनास्ति
कोच्छिष्टभाषणं॥ असत्यभाषणं चैव कौटिल्यं च परित्यजेत्॥ सद्भिरपि न भाषेत जपहोमार्चनादि
षु॥ वाग्यतः कर्मनिर्वृत्तौ निष्ठ्यूतो वनितादिषु॥ वर्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनं॥ ताम्बूल
गन्धलेपं च पुष्पधारणमेव च॥ मैथुनं तत्कथालापं तद्गोष्ठीं परिवर्जयेत्॥ कौटिल्यं क्षौद्रमभ्यंग
मनिवेदितभोजनं॥ असंकल्पितकृत्यं च वर्जयेन्मर्दनादिकं॥ स्नायाच्च पंचगव्येन केवलामलके
न वा॥ श्रुतिस्मृतिपुराणोक्तैर्मंत्रैः स्नायादनन्तरं॥ स्नानं त्रिषवणं प्रोक्तमशक्तौ द्विः शकृत्तथा॥
अस्नातस्य फलं नास्ति न चातर्पयतः पितॄन्॥ स्वजप्यमंत्रेणानुकुंभमुद्रया निमज्जनं स्यानुपदेश्य
मस्तके॥ सप्तविंशत्यभिषेकमाचरेत्॥ तथा षड्जप्त्वाचमनं च संततमिति॥ इति श्रीशैवमाधवपा
ठकाग्निहोत्रिसुतशैवगोपनाथपाठकाग्निहोत्रिविरचिते पुरश्चर्याविधौ गुरुशिष्यपरीक्षादिः
सर्वविधिः॥ अथ जपविधानं॥ तत्र शुभे दिने नदीपर्वतमस्तकादौ क्षेत्रं परिकल्प्य क्षेत्रपालपूजां
विधाय पूर्वोक्तदिक्पस्थानमाश्रित्य जपमारभेत्॥ तथा चकोमे॥ अद्व्यपर्वतः पुण्यो नदीतीरा

णियानि च॥ सर्वाण्यश्वामिका न्याहुर्न्नेहिनेषु परिग्रहः॥ ततोस्य त्र भूगृहं कुर्यात् तदुक्तं ग्रंथांतरे॥ एवं पूर्व
समीरिते न विधिना शान्त्या स्वयं सादरं संपाद्याखिलसाधनानि विधिवत् श्रीसद्गुरोः शासनाज्ञातः स्वस्य
पुनः स्नातः॥ स्वविहितो स्थैरासने भूगृहं कुर्यान्मंत्रमुद्रा रचयन्निति मतानुष्ठाने हेलो वर्णः॥ गृ… तस्यास्य मं
त्रस्य पुरश्चरणसिद्धये॥ ममेयं गृहाते भूमिर्मंत्रो मंत्रसिद्धताम् इति॥ मंत्रेण॰ ततो ज्ञाताज्ञातपापक्षयार्थं सह
स्रपंचकं त्रयं वाष्टोत्तरसहस्रं वा गायत्रीं जपित्वा ब्राह्मणभोजनादिनाभ्यर्च्य गुरुं च वस्त्रालंकारादिभिः॥
ततो हविष्यान्नेनैव भोजनं कुर्यात्॥ कस्यचिन्मते उपवासं कुर्यात्॥ उक्तं च सनत्कुमारकल्पे॥ विप्रान्संतर्प
येदन्नभोजनाच्छादनादिभिः॥ वृद्धिभिर्वस्त्रभूषाभिः प्रणमेद्गुरुमात्मनः॥ आरंभे च जपं पश्चात् तदनुज्ञापुरः
सरमिति पूर्वदिनकृत्यं ततो जपारंभदिने स्नानादिकं विधाय दीपस्थाने गत्वासनविधिं च संपाद्य संकल्पं
कुर्यात्॥ स यथा॰ अद्येत्यादि पंचांगस्मरणा अमुकाक्षरा अमुकमंत्रस्य सिद्धिकामोऽमुकसंख्याजपदशांश
होमतर्पणाभिषेकात्मकपुरश्चरणमहं करिष्ये इति संकल्प्य अमुकमंत्रस्यामुकऋषिः अमुकछंदः अमुक
देवता पुरश्चरणजपे विनियोगः॥ इत्युक्त्वा ऋष्यादिन्यासान् ध्यानं च कृत्वा॥ ॐ माले सर्वदेवानां सर्वसिद्धिप्रदाम
ता॥ तेन सत्येन मे सिद्धिं मातर्देहि नमोस्तु ते॥ इति जपमालां प्रार्थ्य हस्ते कृत्वा देवोहमिति भावयित्वा जपमा
रभेदिति॰ पुरश्चरणजपे दिवसातिक्रमो न कर्तव्यः जपस्तु प्रत्यहं न न्यूनो नाधिको न त्वरया कार्यः उक्तं च
नारदीये॰ नैरंतर्यविधिः प्रोक्तो न दिनं व्यतिलंघयेत्॰ दिवसातिक्रमे तेषां सिद्धिरोधः प्रजायते॰ शनैः श
नैरतिस्पष्टं न द्रुतं न विलंबितं॥ न न्यूनं नातिरिक्तं वा जपं कुर्याद्दिने दिने॰ मध्यादिनावधिश्च उक्तं च विश्वं

ड्रिकायां·शिवाद्रौश्च गुरूणान्त्या जपं कुर्यात्समाहितः·उक्तं संख्यामितं प्रातःकालान्मध्यंदिनावधि॥ मानसः
10 सिद्धिकामानां पुष्टिकामे रूपांशुकः·वाचिको मारणे चैव प्रशस्तो जप ईरितः॥ शयनं दर्भशय्यानां शुचिः प्रय
तमानसः॥ नैकवासा जपेन्मंत्रं बहुवस्त्राकुलो न वः॥ गोभिलोपि·नार्द्रवासा जपं कुर्यात् होमं दानं प्रति
ग्रहं॥ सर्वं तद्राक्षसं विद्यात् बहिर्जानु च यत्कृतं॥ न पदा पादमाक्रम्य तथैव हि पदा करौ॥ न चासमाहि
तमना न च वासं श्रयं जपेत्॥ न च चंक्रमणश्चैव न पार्श्वमवलोकयन्॥ न प्रावृतो न जल्पंश्च न प्रा
वृतशिरास्तथा॥ अशुचिर्दर्शने·उक्तं सनत्कुमारकल्पे·जपकाले यदा पश्येदशुचिं मंत्रवित्तमः॥ प्रा
णायामस्तदा कार्यस्ततः शेषं समाचरेत्॥ यदा चैष भवेन्मंत्री स्वयमप्यशुचिः पुनः॥ आचांतः प्रय
तो भूत्वा न्यासं पूर्ववदाचरेत्॥ मौनेन जपं कुर्यात्·तदुक्तं मंगिरसा संध्ययोरुभयोर्जाप्ये भोजने
दंतधावने॥ पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः॥ गुरूणां सन्निधौ दाने योगे चैव विशेषतः॥
एषु मौनं समातिष्ठन् स्वर्गमाप्नोति मानवः॥ मौनापचारे प्रायश्चित्तं तदुक्तं ग्रंथांतरे॥ सकृदुच्चारि
ते शब्दे प्रणवं समुदीरयेत्·प्रोक्तं पामरशब्देपि प्रणवं सकृदुच्चरेत्॥ योगयाज्ञवल्क्यश्च·यदि वाग्य
मलोपः स्याज्जपादिषु कथंचन॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं·शाकयनोपि·स्नाते निष्ठीव
ने चैव दंतोच्छिष्टे तथानृते·पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत्॥ अग्निरापश्च वेदाश्च सोम
सूर्यानिलस्तथा·सर्वे एते हि विप्रस्य कर्णे तिष्ठंति दक्षिणे·अन्यच्च·जपश्रांतस्तु तं ध्यायेत्

ध्यायेत् ध्यानश्रान्तस्तु तं जपेत्। जपध्यानसमायुक्तो मंत्री सिद्ध्यति नान्यथेति। अथ पुरश्चरणस्वरूपमु
च्यते। पूजा त्रैकालिकी नित्यं जपस्तर्पणमेव च॥ होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते। कुलार्णवे च। पंचा
ङ्गानि महादेवि जपहोमश्च तर्पणं। स्याभिषेकश्च विप्राणामाराधनमपीश्वरि। पूर्वं पूर्वं दशांशेन पुरश्च
रणमुच्यते। सनत्कुमारोपि। होमस्यानियतत्वात्तु तर्पयेद्दशांशेन सद्यतेनपयोम्भसा। कुर्याद्दशांश
तो होमं ततः सिद्धो भवेन्मनुरिति। स्कन्दे। पूजया विप्रलक्षं स्यादग्निकार्येण संपदः॥ जपेन पापसंशुद्धिर्ध्या
नध्यानेन मुच्यते। वसिष्ठसंहितायां। इषुमात्रं स्थण्डिलं वा संक्षिप्ते होमकर्मणि। क्रियासारे। होमोद्दिष्टस्तु
प्रागवहः प्रागुदक्प्रवहोथवा। उदग्वहः प्रदेशो वा स्थण्डिलस्य स्थलं स्मृतमिति। पिंगलामते। होमे प्रशस्य
ते कुंडं स्थण्डिलं बहुसन्मितिं। वायवीयसंहितायां। अथाग्निकार्यं वक्ष्ये कुंडे वा स्थण्डिलेपि वा। वेद्यामप्याय
सपात्रे मृन्मये वा नवे शुभे। स्थण्डिलं वा प्रकुर्वीत सुसिद्धैः सिकतैः सितैः इति स्थलं। कुंडे वा स्थण्डिले वापि कुं
डे होमः प्रशस्यते। होमोक्तविधिना चैव कुर्याद्देशाधिकोत्तमः॥ कुंडं तु नारदेनोक्तं हस्तमात्रं शुभं मतं। अथ
होमकालः॥ वसन्ते चैव पूर्वाह्णे मध्याह्ने ग्रीष्म उच्यते। अपराह्णे भवेद्वर्षाः शरच्चैवार्द्धरात्रके। उषाहो
मे तथैश्चैव संध्यायां शिशिरः स्मृतः॥ ग्रीष्मे उच्चाटनं कुर्यात्स्तंभनं प्रावृषे तथा। शरद्धि शान्तिकं कुर्याद्धेमं
ते मोहनं कुरु। शिशिरे मारणं ज्ञेयं वसन्ते वश्यकर्मणि। स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसन्निभः॥ वह्नि
वर्णः शुभावहः भेरीवारिदहस्तीनां ध्वनिवद्वह्निः शुभावहः नागचंपकपुन्नागपाटलायूथिकानिभः॥

घोवह्नेर्भुमावहः काकस्वरस्तु रोवह्नेर्जपमानस्य दुःखदः कम्पः कृष्णगतेर्वर्णो यजमानं विनाशयेत्
॥ एवं दुष्टेषु चिह्नेषु प्रायश्चित्तायदेशिकः मूलेनाज्येन जुहुयात्तं च विंशतिराहुतिः इति वह्निलक्षणं अथ
होमद्रव्याणि प्रमाणं च कल्पे पलाशपुष्पहोमेन सर्वसत्वमवाप्नुयात् अश्वत्थस्य समिद्धोमात् ब्राह्म
णः सुस्थिरो भवेत् दूर्वाहोमाद्धनाप्नोति दीर्घायुष्यं न संशयः अन्नाज्यहोमादाप्नोति मुनिराज्यं वृद्धि
जौतमः कन्याकामो लभेत्कन्यां लाजाहोमेन सुव्रतः। वैराग्यकामो वैराग्यं लभते घृतहोमतः श्रि
यार्थी श्रियमाप्नोति बिल्वपत्रस्य होमतः पुत्रकामो लभेत्पुत्रं जीवपुत्रस्य होमतः आरोग्यका
म आरोग्यं लभते तिलहोमतः ॥ यद्यदिच्छति तत्सर्वं लभते पुष्पहोमतः अन्यच्च पैर्णीजपे च होमे च
संख्या नोक्ता महर्षिभिः ॥ तेषामष्टसहस्राणि संख्योक्ता जपहोमयोः यस्मिंस्तु निगदे नैव मंत्रसंख्या
विधीयते तत्र सर्वत्र मंत्राणां वृद्धिर्युगक्रमात् कल्पोक्ता च कृते संख्या त्रेतायां द्विगुणा स्मृ
ता द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणा सनत्कुमारेण च तद्यथा स्वाहान्तेनैव मंत्रेण हो
मकार्यो विजानता नमोन्तेन नमस्कारो मकारान्तेन वै जपः न्यसेत्त्रयं जपे मंत्रं ततः सिद्धो भवत्ययं
संन्यासिनां न होमोस्ति न चाप्यासनतर्पणं जपमात्रेण सिद्धिः स्यात्तर्पणादि विकल्पितमिति तथा
च गौतमीये होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः इतरेषां तु वर्णानां त्रिगुणादिर्विधीयते ॥ कुं

भसंभवस्थ्य यद्दंशं विहीयेत तत्संख्याद्विगुणो जपः कर्तव्यः सांगसिद्ध्यर्थं तद्दशांशोक्तेन भक्तित इति· कश्चित्तु प्रत्य
हं जपदशांशतर्पणमार्जने करोति कश्चित्तु लक्षे पूर्णे करोति तावपि सांप्रदायकौ· उक्तं च नारदीये· स्वजपस्य
दशांशेन होमं कुर्याद्दिने दिने· अथवा लक्षपर्यंते होमः कार्यो विपश्चितेति· अनंतरं दशांशतर्पणमार्जनं च
कुर्यात्· तत्र वैशंपायनः तर्पणस्य दशांशेन नमोंतं मंत्रमुच्चरेत्· अभिषिंचेत्स्वमूर्ध्नि जलैः कुंभास्य
मुद्रया· अथ होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च सूकरी· शांतिके च मृगी ज्ञेया हंसी पौष्टिककर्मणि· सूक
री त्वभिचारेषु कार्या तंत्रविदुत्तमैः सूकरी करसंकोचः हंसी मुक्तकनिष्ठिका· मुक्तकनिष्ठतर्जन्यौ मृगी
मुद्रा प्रकीर्तिता· अभिचारादिहोमेषु सूकरी कथिता बुधैः सूकरी पुत्रकामाय धनकामाय हंसिनी· मृ
गी मोक्षे प्रकर्तव्या आहुतिः सर्वकामिका· हुतं यन्मुद्रया हीनं तत्सर्वं निःफलं भवेत्· अथ संक्षेपपुरश्चरण
विधिः कृष्णाष्टमीं समारभ्य यावत्कृष्णस्य चतुर्दशी· देवं ध्यात्वा जपेन्मंत्रमयुतानां चतुष्टयं· दशांशं हो
मयेत्तस्या तर्पयेत् तर्पयेदभिषेचयेत् ततः सिद्धो भवेन्मंत्रं चाब्रवीत्कुंभसंभवः तद्यथा· पूर्वोक्तमासतिथ्या
दौ अष्टम्यां स्नानादिकं कृत्वा जपस्थाने आसनविधिं च कृत्वा संकल्पं कुर्यात्· अद्येत्यादि अमुकाक्षराऽमु
कमंत्रस्य सिद्धिकामोऽयुतचतुष्टयसंख्याकजपदशांशहोमतर्पणाभिषेकात्मकपुरश्चरणमहं करिष्ये
तत्राष्टम्यादि चतुर्दशीपर्यंतं प्रतिदिनं पंचसहस्रं सप्तशत चतुर्दशसंख्याकं चतुर्दश्यां चतुर्दशस्थाने शो
ऽशसंख्याकं जपमहं करिष्ये इति संकल्प्य न्यासादिकं च कृत्वा जपं कुर्यात् जपांते होमादिकं च· प्रकारांतरं

उक्तं कुलार्णवे· मंत्री तु प्रजपेन्मंत्रं मातृकाक्षरसंपुटं· क्रमोत्क्रमाच्छजाप्यस्तामासात्सिद्धो भवेन्मनुः मातृका
क्षरसंपुटं· क्रमोत्क्रमाच्छजाप्यसामासात्सिद्धो भवेन्मनुः मातृकाजपमात्रेण मंत्राणां कोटिकोटयः सिद्ध्यन्त्यत्र न
च संदेहो यस्मात्सर्वं तदुद्भवमिति· अत्र शतमष्टोत्तरं न्यूनसंख्याप्यवच्छेदकं अष्टोत्तरशतसंख्यं जपेदित्यर्थः
अत्रापि प्राथम्ये तिथ्यादिकं कृत्वा रंभादिने यद्दिनमारभ्य मासपर्यंतं प्रतिदिनमष्टोत्तरशतसंख्याकं जपमहं करि
ष्ये इति संकल्प्य जपमारभेत्· मातृकोच्चारणं तु सानुस्वारं कुर्यात्तत्र यथा· अं आं इं ईं उं ऊं एवं मासपर्यंतं जपं
कृत्वा· मासांते होमादिकं कुर्यात्· एवं पुरश्चरणं भवति· अथवान्यप्रकारेण पुरश्चरणमुच्यते· गृहलोकस्य वै
दोर्वा शुचिः पूर्वं सुयोषितः नद्याः समुद्रगामिन्यां नाभिमात्रे भसि स्थितः स्पर्शाद्धिमुक्तिपर्यंतं जपेन्मंत्रं समाहि
तः तावत्कालं जपित्वा तु होमादिकं समाचरेत्· इति कुलप्रकाशतंत्रे उक्तं· पूर्वदिने उपवासमेकभक्तं वा कुर्यात्॥
कुलार्णवे· अन्नैश्चतुर्विधैर्देवि पदार्थैः षड्रसान्वितैः सुभोजितेषु विप्रेषु सर्वं हि सफलं भवेत्· सम्यक्कृ सिद्धे
क मंत्रस्य पंचांगोपासनेन च· सर्वमंत्राश्च सिध्यंति तत्प्रभावात्कुलेश्वरि· उपदेशस्य सामर्थ्यात् श्रीगुरोश्च प्रसाद
तः मंत्रप्रभावाद्भक्त्या च मंत्रसिद्धिः प्रजायते यदृच्छया श्रुतं मंत्रं छलेनापि बलेन वा· प्रेरिते वा गाथादौ यज्ज
पेत्तदनर्थकृत्· पुस्तके लिखिता मंत्रा नो लोक्य प्रजपंति ये· ब्रह्महत्यासमं तेषां पातकं परिकीर्तितं· स्वप्नोपादि
ष्ट मंत्रस्य न विधिर्नैव च क्रिया· उपदेष्टृदेवतां ध्यात्वा जपेच्छुभकरं भवेत् आवाह्य देवतामेकामर्चयित्वान्यदे
वतां· उभाभ्यां लभते शापं मंत्री वै बलमानसः· ग्रंथांतरे च· निश्चयोत्साहधैर्यैश्च तत्वज्ञानस्य दर्शनात्· अ

ल्पाशी स्यात्कृसंगश्च षड्भिर्मंत्रः प्रसिध्यति · अन्यच्च · प्रवासी बहुभक्षी च प्रजल्पी नियमग्नहः ॥ नीचसंगश्च
लौल्यं च षड्भिर्मंत्रो न सिध्यति · शिवोपि · मनसंहरणं शौचं मौनं मंत्रार्थचिंतनं · अव्यग्रत्वमनिर्वेदो जपसिद्धस्तु
हेतवः ॥ गुप्तवीर्याश्रये मंत्रा नदास्यंति फलं प्रिये · मंत्राश्चैतन्यसहिता सर्वसिद्धिकरा स्मृता · चैतन्यरहिता मं
त्रा प्रोक्ता वर्णास्तु केवला ॥ फलं नैव प्रयच्छंति लक्षकोटिजपादपि · अथवा देवतारूपं गुरुं ध्यात्वा प्रतोषयत् · तस्ये
च्छानुसारी स्याद्भक्तियुक्तेन चेतसा ॥ गुरुमूलमिदं सर्वं तस्मान्नित्यं गुरुं जपेत् · पुरश्चरणहीनोपि मंत्रसिध्ये
न संशयः · श्रीभवानपि · संतुष्टो हि गुरुर्यस्य तस्य तुष्टं जगत्त्रयं · नास्य साध्यं जगत्यत्र सुप्रसन्ने गुरौ मुने
एवं पुरश्चरणं कृत्वा गुरुं देवतामभिवंद्यावनाद्विना शुश्रूषया विधा जपेत् · एतत्कर्मपरिसमाप्तौ कल्पोक्ता
ब्रालेणान्भोजयित्वा अन्यानि प्रयोजनानि साधयेदिति · श्रीनाथगोपालमहं प्राप्तो विश्वानंदरूपं परमाश्र
मस्तं · यस्य प्रसादेन तमाश्रिता येद्यानंदपूर्णप्रभवंति नित्यं · नानाग्रंथान्समालोक्य श्रीमान्गोपीनाथः
कृती ॥ पुरश्चर्याविधिं सम्यक्कृत्वा प्यकार्थमचीकरत् ॥ इति श्रीम[illegible]त्परमहंसपरिव्राजकाचार्यश्रीकृष्णपादशि
ष्यपूज्यपादस्वरूपाकटाक्षासादितपरमानंदैकरसशैवमायवपाठकाग्निहोत्रिसुतशैवगोपीनाथपा
ठकाग्निहोत्रिविरचितः पुरश्चरणविधिः समाप्तः ॥ देवीयामले · जपादौ वाचनविधिः कार्यो दीक्षान्वितैर्न
रैः · नास्ति पापं यतस्तेषां सूतकं च यतात्मनां · मृडानीतंत्रे · मृतके सूतके चैव धूमोद्गारादिके तथा · जपं चा
र्धं तथा कुर्यात · मंत्रन्यासपुरःसरं · विष्णुयामले · शिवविष्णुर्चने दीक्षा यस्य चाग्निपरिग्रहः ॥ ब्रह्मचारि

यतीनां च शरीरे ॥ नास्ति सूतकं ॥ नारदतंत्रे ॥ सूतके मृतके चैव नित्यं विघ्नमयस्य च ॥ सानुष्ठानस्य विप्रें
द्रस्य च शुद्धिः प्रजायते ॥ ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ॥ पूजां गृह्णामि शूद्राणां पुनः सा चारवर्त्म
नां ॥ लिंगपुराणे ॥ न चैवापूज्य भुंजीत शिवलिंगं महेश्वरि ॥ सूतके मृतके वापि न त्याज्यं शिवपूजनं ॥ अन्य
त्रापि ॥ अग्निहोत्रे गवां गोष्ठे तीर्थेष्वपि च पर्वसु ॥ राहोर्दर्शनकाले च सूतकं नैव विद्यते ॥ इति पुरश्चरण
विधिः ॥ यत्कृष्णप्रणिपातधूलिधवलं तद्वै शिरः स्याच्छुभं ॥ नेत्रे ते तमसोज्झिते च शुचिरे याभ्यां ह
रिर्दृश्यते ॥ सा बुद्धिर्नियमे यमेश्च विमला या माधवे ध्यायनी सा जिह्वामृतवर्षिणि प्रतिपदं य
स्तौति नारायणम् ॥ श्रीभवानीशंकराभ्यां नमः ॥